तड् इति भाषा ॥ (यथा, हरिवंशे । ६७।५५ ।
"कर्त्तयमार्गौ आजेते हृदस्यास्य तटावुभौ ॥"
महादेवे, पुं । सर्व्वोच्छ्रितत्वादस्य तथात्वम् ।
यथा, महाभारते । १२ । २८४ । ३६ ।
"नमस्तटाय तथाय: तटानाम्पतये नम: ॥")

तटस्थं, क्ली, लक्षणविशेष: । तस्य स्वरूपं यथा, तद्भिन्नत्वे सति तद्बोधकत्वम् । तथाच ।

"स्वरूपं तटस्थं द्विधालक्षणं स्यात्
स्वरूपस्य बोधो यतो लक्षणाभ्याम् ।
स्वरूपे प्रविष्टात् स्वरूपेऽप्रविष्टात्
यथा काकवन्तो गृहा: खं विलश्च ॥"
इति वेदान्तकारिका ॥

(तटे तिष्ठतीति । स्था+क: ।) तटस्थिते, त्रि ॥ (उदासीन: । यथा, नैषधे । ३ । ५५ ।
"धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या ।
समीरसङ्गादिव नीरभङ्गा
मया तटस्थस्त्वमुपद्रुतोऽसि ॥"
समीपस्थ: । यथाह वल: ।
"तटस्थ: स्यादुदासीने तीरस्थनिकटस्थयो: ॥")

तटाक:, पुं, (तटमकति गच्छतीति । अक+ "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) तड़ाग: । पद्मादियुक्तसर: । इति शब्दरत्नावली । (यथा, वैराग्यशतके । ४६ ।
"प्रादेशमात्रमुदरं परिपूरयितुं कियानयं यत्न: ।
चुलकेनाम्ब: पातुं खनितव्य: किं तटाकोऽपि ॥")

तटिनी, स्त्री, (तटमस्त्यस्या इति । तट+"अत इनिठनौ ।" ५ । २ । ११५ । इति इनिस्ततो ङीप् ।) नदी । इत्यमर: । १।१०।३० ॥ (यथा, आर्य्याशप्तशत्याम् । ६६२ ।
"हत्वा तटिनि ! तरङ्गैर्भ्रमितश्चक्रेषु नाशये निहित: ।
फलदलवल्कलरहितस्त्वयान्तरिक्षे तरुस्त्यक्त: ॥")

तटी, स्त्री, (तटति उच्छ्रिता भवतीति । तट+ अच् । ङीष् ।) तीरम् । इत्यमर: । १।१०।७ ॥ (यथा, साहित्यदर्पणे । ३ । ८६ ।
"मालयश्च स्मशानश्च नदादीनां तटी तथा ॥")

तड, इ ड आहतौ । इति कविकल्पद्रुम: ॥ (भ्वां-आत्मं-सकं-सेट् ।) इ, तण्ड्यते । ड, तण्डते । इति दुर्गादास: ॥

तड, क त्विषि । आहतौ । इति कविकल्पद्रुम: ॥ (चुरां-परं-अकं-सकं च-सेट् ।) क, ताड़यति । त्विषि दीप्तौ । इति दुर्गादास: ॥

तड़ग:, पुं, (तण्ड्यते आहन्यते ऊर्म्मिभिरिति । तड़+आग: । पृषोदरादित्वात् आलोपे साधु: ।) तड़ाग: । इति द्विरूपकोष: ॥

तड़ाक:, पुं, (तण्ड्यते आहन्यते ऊर्म्मिमालाभिरिति । तड़ि आहतौ+"पिनाकादयश्च ।" उणां ४ । १५ । इति आकप्रत्ययेन निपातनात् साधु: ।) तड़ाग: । इति शब्दरत्नावली ॥

तड़ाका, स्त्री, (तड़ाक+स्त्रियां टाप् ।) नदीसमुद्राणां तटभाग: । (तडि आहतौ+भावे आक: ।) आघात: । इति संक्षिप्तसारे उणादिवृत्ति: ॥ (प्रभा । इत्युज्ज्वलदत्त: । ४ । १५ ॥)

तड़ाग:, पुं क्ली, (तड+तड़ागादयश्च । इति आगप्रत्ययेन निपातनात् साधु: ।) यन्त्रकूटक: । इति मेदिनी । गे, ३६ ॥ (तण्ड्यते आहन्यते ऊर्म्मिमालाभिरिति । तड़ि आहतौ+कर्म्मणि आक: ।) पद्मादियुक्तं सर: । तत्पर्य्याय: । पद्माकर: २ । इत्यमर: । १ । १० । २८ ॥ तड़ाक: ३ तटाक: ४ । इति शब्दरत्नावली ॥ तड़ग: ५ । इति द्विरूपकोष: ॥ शतधनु:परिमाणजलाशय: । चतुर्दिक्षु पञ्चचत्वारिंशद्धस्तान्यूनतायां सहस्रद्वितयहस्तान्यूनत्वेन तड़ाग: । इति नयवर्द्धमानधृतो वशिष्ठ: ॥ * ॥ तस्य जलगुणा: । वायुकारित्वत् । स्वादुत्वम् । कषायत्वम् । पाके कटुत्वम् । शिशिरहिमकाले प्रशस्तत्वञ्च । इति राजवल्लभ: ॥ * ॥ तस्योत्सर्गविधिर्यथा,—

पुलस्त्य उवाच ।
"श्रृणु राजन्महाबाहो ! तड़ागादिषु यो विधि: ।
पुराणेष्वितिहासेषु मन्यते राजसत्तम ! ॥
प्राप्य पक्षं शुभं शुक्लमागते चोत्तरायणे ।
पुण्येऽह्नि विप्रै: क्रियते कृत्वा ब्राह्मणवाचनम् ॥
प्राक्प्रस्रवणादम्भस्तड़ागस्य समीपत: ॥
चतुर्हस्तसमा वेदी चतुरस्रा समन्तत: ।
तथा षोड़शहस्त: स्यान्मण्डपश्च चतुर्मुख: ॥
वेद्या उत्तरतो गर्त्तारत्निमात्रा तु मेखला ।
नवसप्ताथवा पञ्च योनिवक्त्रा नृपात्मज ! ॥
वितस्तिमात्रा योनि: स्यात् षट्सप्ताङ्गुलविस्तृता ।
सर्व्वे स्वहस्तमात्रा: स्युस्त्रिपर्व्वोच्छ्रितमेखला: ॥
सर्व्वे च सर्व्ववर्णा: स्यु: पताकाध्वजसंयुता: ।
अश्वत्थोड़म्बरप्लक्षवटशाखाकृतानि च ॥
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत् ॥
शुभास्तत्राष्ट होतारो द्वारपालास्तथापरे ।
अष्टौ तु जापका: कार्य्या ब्राह्मणा वेदपारगा: ॥
सर्व्वलक्षणसम्पूर्णा मन्त्रविद्विजितेन्द्रिया: ।
कुलशीलसमायुक्ता: स्थापिता द्विजसत्तमा: ॥
प्रतिस्तम्भेषु कलसा यज्ञोपस्करणानि च ।
व्यजनञ्चासनं शुभ्रं ताम्रपात्रं सुविस्तरम् ॥
आचार्य्य: प्रक्षिपेद्भूम्यामनुचन्द्रं विचक्षण: ।
त्र्यरत्निमात्रो यूप: स्यात् क्षीरिवृक्षविनिर्म्मित: ॥
यजमानप्रमाणो वा संस्थाप्यो भूतिमिच्छता ॥
हेमालङ्कारिण: कार्य्या: पञ्चविंशतिऋत्विज: ॥
कुण्डलानि च हैमानि केयूरकटकानि च ।
तथाङ्गुलीपवित्राणि वासांसि विविधानि च ॥
दद्यु: समानि सर्व्वेषामाचार्य्ये द्विगुणं पुन: ।
दद्याच्छयनसंयुक्तमात्मनश्चापि यत् कृतम् ॥
सौवर्णौ कूर्म्ममकरौ राजतौ मत्स्यडुण्डुभौ ।
तथा कुलीरमण्डूका वायस: शिशुमारक: ॥
एवमासाद्य तत् सर्व्वं स्वर्णपात्रं विशाम्पते ! ।
शुक्लमाल्याम्बरधर: शुक्लगन्धानुलेपन: ॥
सर्व्वौषध्युदकस्नात: पाठितो वेदपुङ्गवै: ।
यजमान: सपत्नीक: पुत्रपौत्रसमन्वित: ॥
पश्चिमं द्वारमासाद्य प्रविशेद्यागमण्डपम् ।
ततो मङ्गलशब्देन भेरीणां निस्वनेन च ॥
रजसा मण्डलं कुर्य्यात् पञ्चवर्णेन चार्च्चितम् ।
षोड़शारं ततश्चक्रं पद्मरागसुशोभनम् ॥
वेद्यामुपरि तत् कृत्वा ग्रहान् ग्रहपतींस्तथा ।
संन्यसेन्मन्त्रत: सर्व्वान् प्रतिदिक्षु विचक्षण: ॥
तत् पात्रं स्थापयेन्मध्ये वारुणं मन्त्रमाश्रितम् ।
ब्रह्माणञ्च शिवं विष्णुं तत्रैव स्थापयेद्बुध: ॥
विनायकञ्च विन्यस्य कमलामम्बिकां तत: ।
शान्त्यर्थं सर्व्वलोकानां भूतग्राममशेषत: ।
पुष्पभक्ष्यफलैर्युक्तमेवं कृत्वाधिवासनम् ।
कुम्भांश्च रत्नगर्भांश्च वासोभि: परिवेष्टयेत् ॥
गन्धपुष्पैरलङ्कृत्य द्वारपालान् समन्तत: ।
पठध्वमिति तान् ब्रूयादाचार्य्यमपि पूजयेत् ॥
बह्वृचौ पूर्व्वत: स्थाप्यौ दक्षिणे च यजुर्व्विदौ ।
पश्चिमे सामगौ स्थाप्यावुत्तरेणाप्यथर्व्वणौ ॥
उदङ्मुखो दक्षिणतो यजमान उपाविशेत् ।
पठध्वमिति तान् ब्रूयात् यजध्वमिति याजकम् ॥
उत्कृष्टमन्त्रपाठेन तिष्ठध्वं मन्त्रजापका: ।
एवमादिश्य तान् सर्व्वान् पर्य्युक्ष्याग्निं स मन्त्रवित् ॥
जुहुयादाहूतीर्म्मन्त्रैराज्यञ्च समिधस्तथा ।
ऋत्विग्भिश्चैव होतव्यं वारुणैरेव सर्व्वत: ॥
वैराजं पौरुषं सूक्तं पौष्णं चन्द्रं सुसंहितम् ।
शैशवं पञ्चनिधनं गायन्ति ज्येष्ठसामगा: ॥
वामदेवं बृहत्साम रौरवं सरथन्तरम् ।
गवां व्रतं विकर्णञ्च रक्षोघ्नं नरथन्तथा ॥
गायन्ति सामगा राजन् ! पश्चिमद्वारमाश्रिता: ।
आथर्व्वणाश्चोत्तरत: शान्तिकं पौष्टिकं तथा ॥
जपन्ते मनसा देवमाश्रिता वरुणं प्रभुम् ।
पूर्व्वेद्युरभितो मन्त्रैरेवं कृत्वाधिवासनम् ॥
गजाश्वरथ्यावल्मीकसंग्रामरथगोकुलात् ।
मृदमादाय दद्याच्च प्रक्षिपेच्च यथा तथा ॥
रोचनाञ्च ससिद्धार्थान् गन्धान् गुग्गुलमेव च ।
स्नपनं तस्य कर्त्तव्यं पञ्चगव्यसमन्वितम् ॥
मूर्द्धि्न कर्त्तुर्म्महामन्त्रैरेवं कृत्वा विधानत: ।
एवं रक्षति राज्ञार्थान् विधियुक्तेन कर्म्मणा ॥ * ॥
तत: प्रभाते विमले संजाते तु गवां शतम् ।
ब्राह्मणेभ्य: प्रदातव्यं होमान्ते वाथवा पुन: ॥
पञ्चाशद्वाथ षट्त्रिंशत् पञ्चविंशतिरेव च ।
तत: संवत्सरे प्राप्ते शुद्धे लग्ने सुशोभने ॥
वेदशब्दैश्च गान्धर्व्वैर्व्वाद्यैश्च विविधै: पुन: ।
कनकालङ्कृतां कृत्वा जले गामवतारयेत् ॥
सामगाय च सा देया ब्राह्मणाय विशाम्पते ! ।
पात्रीमादाय सौवर्णीं पञ्चरत्नसमन्विताम् ॥
तत्र नि:क्षिप्य मकरं मत्स्यादींश्चैव सर्व्वश: ।
धृतांश्चतुर्भिर्व्विप्रैश्च वेदवेदाङ्गपारगै: ॥
महानदीजलोपेतान् दध्यक्षतविभूषितान् ।
उत्तराभिमुखो युक्तो जलमध्ये प्रक्षालयेत् ॥
आथर्व्वणेन सुस्नात: पुनर्म्मामांसस्थेव च ।
आपो हि ष्ठेतिमन्त्रेण क्षिपेदागत्य मण्डपम् ॥